१ सम्यक्त्वस्य द्वितीया क्षयोपशमसम्यक्त्वकल्याति पद् प्रकृतीनाम् उपशमे एकसम्यक्त्वप्रकृतिमिथ्यात्वस्याभावे सति । २ अन्यत्र द्वितीय वाजपों अस्य सम्यक्त्वस्य लाभे सति ततः मिथ्यात्वं भवति अथवा तृतीयगुणस्थाने भवति ।

अथादिसंज्ञया सर्वां प्रवृत्तिं कुरुते यतः ।
ततो न मानसाभावे प्रवृत्तिस्तस्य बाध्यते ॥ ३२२ ॥

शरीरत्रयपर्याप्तिषट्कयोग्यपुद्गलाः ।
गृह्यते येन स ज्ञेयो दक्षैराहारको मतः ॥ ३२३ ॥
समुद्घातं गतो योगी मिथ्यादृक्सासनायताः ।
विग्रहर्त्यावनाहाराः सिद्धायोगाश्च भाषिताः ॥ ३२४ ॥
भवेदौदारिको दण्डे मिश्रो दण्डकपाटयोः ।
कार्मणो योगिनो योगः प्रतरे लोकपूरणे ॥ ३२५ ॥
सदण्डाररमंथानपूरणानि यथाक्रमम् ।
चतुर्भिः समयैः कृत्वा तावद्भिर्विनिवर्तते ॥ ३२६ ॥
षण्मासायुषि शेषे स्यादुत्पन्नं यस्य केवलम् ।
समुद्घातमसौ याति केवली नापरः पुनः ॥ ३२७ ॥

उपयोगो मतो द्वेधा बाह्याभ्यन्तरभेदतः ।
स सामान्यविशेषाणां द्रव्याणां दर्शने क्षमः ॥ ३२८ ॥
साकारोऽष्टविधं ज्ञानं विशेषाकारदर्शकम् ।
सामान्यदृक् चतुर्धास्ति दर्शनं भेदमान्तरम् ॥ ३२९ ॥
घातिकर्मक्षये वृत्तिस्तस्य केवलिनः समम् ।
तत्क्षयोपशमेऽन्यत्र क्रमतो वृत्तिरीरिता ॥ ३३० ॥
छद्मस्थवृपयोगास्ति ह्यथाप्यन्तर्मुहूर्तगः ।
साद्यपर्यवसानोऽसौ जायते जिनयोः समम् ॥ ३३१ ॥

---

१ अरणम्—कपाटम् । २ सयोग्ययोगिनो । ३ अन्यस्मिन् काले तस्योपयोगस्य वृत्तिरनुक्रमतः कथिता न तु युगपत् ।

पण्डकर्मोदयाद्भीमा मदिरास्वादतापिका ।
द्वयोर्योगोपयोगाभ्यां संज्ञा पण्डस्य मैथुनं ॥ १५१ ॥
लोभकर्मोदयाज्जातोरीक्षणादुपयोगिनः ।
मूर्च्छोपयोगतः संज्ञा प्रादुरस्ति परिग्रहः ॥ १५२ ॥

य: प्रमाणनयमार्गकोविदो
जीवमार्गणगुणावलोकनम् ।
आदरेण विदधाति शुद्धधीः
सोऽश्नुतेऽमितगतिं शिवास्पदम् ॥ १५३ ॥

इत्यमितगत्याचार्यप्रणीते पञ्चसंग्रहनामकग्रन्थे जीवसमासाख्यः
प्रथमः परिच्छेदः ।

अथ प्रकृतिस्तवः ।

यो ज्ञाता प्रकृतीर्देवो दग्धवान् ध्यानवह्निना ।
तं प्रणम्य महावीरं क्रियते प्रकृतिस्तवः ॥ १ ॥
ज्ञानदृष्ट्यावृती वेद्यं मोहनीयायुषी मताः ।
नामगोत्रान्तरायाश्च मूलप्रकृतयोऽष्टधा ॥ २ ॥
एताः पंच नव द्वे स्युरष्टाविंशतिरुत्तराः ।
चतस्रो नवतिस्त्र्यग्रा द्वे पंच च यथाक्रमम् ॥ ३ ॥
गृहीतः पुद्गलस्कंधो मिथ्यात्वासंयमादिभिः ।
प्रयाति कर्मरूपेण परिणाममनेकधा ॥ ४ ॥
ज्ञानस्योदयमापन्ना[1] शरीरिणि विधायिकाः ।
भुवनाभासनो ज्योतिः सूर्यस्येवाम्बुदावलीः ॥ ५ ॥
मतिश्रुतावधिज्ञाने मनःपर्ययकेवले ।
पंचानामावर्णीयाः पंचज्ञानावरणी[2] विदुः ॥ ६ ॥

---

१ आच्छादिकाः । २ आवरणानि ।

आर्यावृत्तम् ।

निद्रानिद्रा प्रचलाप्रचला स्त्यानादिगृद्धयो निद्रा ।
प्रचला चक्षुरचक्षुरवधिकेवलदर्शनावृतयः ॥ ७ ॥

अनुष्टुप वृत्तम् ।

चारिका दर्शनस्यैता प्रतिहार्य इवात्मन ।
दर्शनावरणस्योक्ता नव प्रकृतयो जिनैः ॥ ८ ॥
मेध्यक्तसामकस्येव सुखदु खविधायिनः ।
द्वे सद्वेद्यमसद्वेद्यं वेद्यस्य प्रकृती मत ॥ ९ ॥
नीयते यन मूढत्व मद्यनेव शरीरवान् ।
मोहनं तद् द्विधा प्रोक्तं दृष्टिचारित्रमोहतः ॥ १० ॥
एकधा बन्धतस्त्रेधा सत्त्वतो दृष्टिमोहनम् ।
त्रेधा सम्यक्त्वमिथ्यात्वसम्यङ्मिथ्यात्वभेदतः ॥ ११ ॥
कषाया नोकषायाश्च द्वेधा चारित्रमोहनम् ।
षोडश प्रथमास्तत्र द्वितीया नव भाषिता ॥ १२ ॥
क्रोधो मानो जिनैर्माया लोभ प्रत्यकमीरितौः ।
तत्रानंतानुबंध्यादि विकल्पेन चतुर्विधाः ॥ १३ ॥
ते च यथार्थनामानः सर्वेऽनंतानुबंधिनि ।
ऽप्रत्याख्यानावरप्रत्याख्यानाभूत्संज्वलना स्मृता ॥ १४ ॥
हास्यं रत्यरती शोको भयं साकं जुगुप्सया ।
स्त्रीपुंनपुंसका वेदा नोकषाया नवेरिताः ॥ १- ॥

---

१ आवरण्या । २ मधुलिप्तखड्गस्येव । ३ कथिता । ४ मद । ५ अप्रत्याख्यानावरण प्रत्याख्यानावरणं संज्वलनं ।

विद्युन्मालाछन्द ।

आयुः श्वाभ्रं तैर्यग्मानं मार्त्यं दैवं तच्चातुर्ध्यम् ।
कारागारप्रायाद्वद्धो येनाङ्गस्ते स्यात्स्वायुष्य ॥ १६ ॥

अनुष्टुप् ।

गतिजातिशरीराद्याः क्रियते येन सूरिद्य ।
कुलालेनेव कुम्भाद्या नामकर्म तदुच्यते ॥ १७ ॥
पिंडापिंडाभिधास्तस्य द्वेधा प्रकृतयो मता ।
पिंडाश्चतुर्दश प्रज्ञैस्तत्राद्याष्टाविंशति पराः ॥ १८ ॥
पिंडा १४ । अपिंडाः २८ । मिलिता ४२ । भेदतः ९३ ।
गतिर्जाति शरीरांगोपांगो संघातसंहती ।
वर्णगंधरसस्पर्शसंघानुपूर्व्यः संस्थिति ॥ १९ ॥
निर्माणागुरुलघ्वाख्ये परघातोपघातने ।
उच्छ्वास आतपोद्योतो तीर्थकृत्वनमोगती ॥ २० ॥
त्रसबादरपर्याप्तप्रत्येकानि स्थिरं शुभम् ।
सुभगं सुस्वरादेय यशःकीर्तिश्च सेतराः ॥ २१ ॥
नारकी येन तैरश्ची मानुषी दैवकी गतिः ।
क्रियते तदादिष्टं गतिनाम चतुर्विधम् ॥ २२ ॥
एकद्वित्रिचतु पंच इन्द्रियाः येन देहिन ।
क्रियंते पंचधा तस्याख्यातिनामइ पंचधा ॥ २३ ॥

आर्यावृत्तम् ।

औदारिकवैक्रियिकाहारकतैजसो परः कर्म ।
इति पंचकायजनकं शरीरनामास्ति पंचविधम् ॥ २४ ॥

अनुष्टुप् ।

अंगोपांगं त्रिकायानामंगोपांगकर्तृ त्रिधा ।
संघ त पंचधांगानां संघातजनकक्षमः ॥ २५ ॥

वज्रर्षभनाराचमाद्यं संहननं परम् ।
वज्रनाराचनाराच अर्द्धनाराचकीलके ॥ २६ ॥
अन्त्यं संहननं प्रोक्तमसंप्राप्तासृपाटिकम् ।
अस्थिबन्धकरं नाम षोढा संहननं विदुः ॥ २७ ॥
जनकं शुक्लादिवर्णानां वर्णनामास्ति पञ्चधा ।
गंधनाम द्विधा प्रशस्ताप्रशस्तगंधकृत् स्मृतम् ॥ २८ ॥
मधुरोऽम्लः कटुस्तिक्तः कषायः पंच च रसाः ।
तेषां विधायकं कर्म रसनामास्ति पंचधा ॥ २९ ॥
कर्कशः शीतलः स्निग्धो गुरुः स्पर्शोऽस्ति सेतरः ।
अष्टानां कारणं तेषामष्टधा स्पर्शनामकम् ॥ ३० ॥
पंचांगबंधनं प्रोक्तं पंचधा नाम बंधनम् ।
चतुर्विधानुपूर्व्यस्ति चतुर्गतिप्रवर्त्तिका ॥ ३१ ॥
आर्यावृत्तम् ।
श्रय समचतुरस्र न्यग्रोधं सादिकुब्जकं भवेत् ।
हुंडं वामनकाख्यं संस्थानं भाषितं षोढा ॥ ३२ ॥
अनुष्टुप् छन्दः ।
नभोगतिर्द्विधा श्रेया प्रशस्ताप्रशस्तगतिप्रदा ।
चतुरशीति निर्माणाः पिंडप्रकृतयो जिनैः ॥ ३३ ॥
त्रिघात यन नीचाय स्थान चित्रकृता यथा ।
प्रकृती तस्य नीचाय द्र प्राक गायकमम ॥ ३४ ॥
या दानलाभभोगानां विघ्नं धीर्योपभोगयोः ।
भांडागारिकवद्दत्त मान्तरायोऽस्ति पंचधा ॥ ३५ ॥
नासः पत्तिनि स्वरुत्वा मोहनप्रकृतिद्वयम् ।
सर्वेषां कर्मणां ज्ञेया बंधप्रकृतयः स्मृता ॥ ३६ ॥

१२० बन्धप्रकृतय ।

अथवा मिश्रसम्यक्त्व बंधसंघातमोदश ।
स्पर्शे मम्र भयन्त्यका गंधेऽष्टौ रसवर्णयाः ॥ ३७ ॥

२ । ५ । ५ । ७ । १ । ८ मिलिता २८ ।

सम्यग्मिथ्यात्वसम्यक्त्वप्रकृतिद्वितयोज्झिताः ।
एताः प्रकृतयो याति कदाचिदपि नायदम् ॥ ३८ ॥

२६ । १२२ उदय प्रकृतय ।

मतनापरवशीणां सर्वाः प्रकृतयोऽगिनाम् ।
बंधादयौ प्रपद्यन्त स्वहेतुं प्राप्य सर्वदा ॥ ३९ ॥

सर्वाः १४८ ।

आर्यावृत्तम् ।

वैक्रियिकाहारकनृयामप्रद्विदशद्वयानि सम्यक्त्वम् ।
सम्यग्मिथ्यात्वाय त्रयादशाङ्कना ज्ञेयाः ॥ ४० ॥

त्रयादश १३ उद्वेलनप्रकृतयः ।

या भिनम्पन्त्यनासाद्य स्वमुख्यनादयं बुधैः ।
उद्वङ्कनाभिधाः प्रोक्ताः कर्मप्रकृतयोऽत्र ताः ॥ ४१ ॥

आर्यावृत्तम् ।

दशविघ्नज्ञानावृतया पटपावृतया नवोपघातास्यम् ।
तैजसकामणनिर्मितवर्णचतुष्टयभयजुगुप्साः ॥ ४२ ॥

मिथ्यात्वागुरुलघुनी कषायपाडशकर्मीरिताः सन्ति ।
ससयुता चत्वारिंशद्ध्रुवसंज्ञा प्रकृतयस्ताः ॥ ४३ ॥

परघातोद्योतातपतीर्थकृदाहारकद्वयानि चोच्छ्वासम् ।
आयुश्चतुष्कमेता एकादश सन्ति शेषास्तथा ॥ ४४ ॥
द्वे वेद गतयो हास्यचतुष्कं द्वे नभोगती ।
षट् संस्थानसंहत्योर्गोत्रे वैक्रियिकद्वयम् ॥ ४५ ॥
चतुष्कमानपूर्वीणां दशयुग्मानि जातयः ।
औदारिकद्वयं वेदा एता नैपरिवृत्तयः ॥ ४६ ॥
नैम्या ६२ ।
एता प्रकृतय साद्यास्तारिंशच्छतममा ।
सत्पुद्गलपरा प्रथा सख्यातीता विपत्ययं ॥ ४७ ॥

आगममार्गप्रकल्पितसारं
यो हृदि धत्ते प्रकृतिविचारम् ।
याति स भव्यो मितगतिदृष्टं
नाकिनिषेव्यं पदमनवद्यम् ॥ ४८ ॥

इति श्रीमदमितगत्याचार्यवर्यप्रणीते पंचसंग्रहनामकग्रंथे
प्रकृतिस्तवाख्यो द्वितीयः परिच्छेदः ॥

अथ कर्मप्रकृतिबन्धस्तवः ।

प्रणम्य भक्तित सर्वान् सर्वज्ञान् सर्वदर्शिन ।
बन्धोदयसदुच्छेदवर्णना क्रियते मया ॥ १ ॥

---

१ क-ख पुस्तकयो ' परघातोपघातातप " इत्यादि पाठ. किन्त्वनेन मात्राधिक्यं । तथा च गोम्मटसार कर्मकाण्डेऽपि ' सेसे तित्थाहारं परघाद च उक्क सव्व आऊणि " इति पाठ परघातचतुष्के परघातोच्छ्वासोद्योतातप प्रकृतय सन्ति । २ मध्रुवसंज्ञा । ३ कदाचित्कस्या कदाचित्कस्या उदय , एतासां नियतोदयो नास्ति । ४ सत्ता ।

बन्धोऽभिधीयतेऽन्योऽन्यं संपर्को जीवकर्मणोः ।
तस्मात् फलदातृत्वं कर्मणामुदयो मतः ॥ २ ॥
समुदीयानुदीर्णानां स्वल्पीकृत्य स्थितिं बलात् ।
कर्मणामुदयावल्यां प्रक्षेपणमुदीरणा ॥ ३ ॥
कर्मणां फलदातृत्वं द्रव्यक्षेत्रादियोगतः ।
उदयः पाकजं ह्ययमुदीरणमपाकजम् ॥ ४ ॥
कर्मणां विद्यमानत्वं यत्सत्त्वं तदभिगद्यते ।
तानि चत्वारि जायन्ते प्रथमाष्टककर्मणाम् ॥ ५ ॥
तदुक्तम्,—
परस्परं प्रदेशानां प्रवेशो जीवकर्मणोः ।
एकत्वकारको बंधो रुक्मकांचनयोरिव ॥ ६ ॥
ग्रहणं कर्मयोग्यानां पुद्गलानां प्रतिक्षणम् ।
सकषायस्य जीवस्य बंधोऽनेकविधः स्थितः ॥ ७ ॥
कर्मणां संगृहीतानां सत्ताख्या विद्यमानता ।
उदयो भुक्तिकालस्तु धान्यानामिव कीर्तितः ॥ ८ ॥
कृष्टाकृष्टापरिस्थानां प्रक्षेपणमुदीरणा ।
असम्प्राप्तकर्मभागानां स्थिराणामुदयावलौ ॥ ९ ॥
जीवकर्मप्रदेशानां विश्लेषो यः परस्परम् ।
अपुनर्भविकाऽस्यापि स क्षयः सर्वकर्मणः ॥ १० ॥
प्रबन्धस्यप्रमत्तान्ता सप्ताष्टौ मिश्रवर्जिताः ।
वर्जितान्यायुषा सप्त मिश्रापूर्वानिवृत्तयः ॥ ११ ॥
विनायुर्मोहनीयाभ्यां षट् सूक्ष्मकषायकाः ।
एकमेव त्रयो बध्नं निबन्धा योगवर्जितः ॥ १२ ॥

---

१ उदयमभिप्राप्तम्, न उदयमप्राप्तं कर्मणाम् ।

[illegible] दृशिव यन्नीपकः ।
[illegible] सनामास्य प्रकीर्तिताः ॥ १० ॥

[illegible] माधुर्यस्य आर्यासिति सुरन्त्र-
[illegible] सापन । तथाहि—

[illegible] भुवि [illegible] सानन्ति [illegible] ।
[illegible] शिता ॥ १ ॥
[illegible] माधुर्य [illegible] ।
[illegible] ॥

[illegible] आर्यासिति श्रीभूपमसूरि[illegible]चिन्ता-
[illegible] सापन । तथाहि—

[illegible] पति ।
[illegible] मुख [illegible] ॥

[illegible] गायत किन्तु [illegible] वैयाकरणस्यापि-
[illegible] । [illegible] [illegible]सम्यापिनी
[illegible] ।

[illegible] मध्य एव तथापि तस्मिन् [illegible]-
[illegible] । [illegible] माधुर्यमेव इत्यमूह ।
[illegible] ।

[illegible] ।
[illegible] तले ॥ ४१ ॥

[illegible] च शायते ।
[illegible] [illegible]
[illegible] [illegible]
[illegible] मध्य[illegible] । अत
[illegible] ।

तस्यदृष्टिरित्थम्,—

५ ०		५	५	५	५	५	६	१	१	१
८ ८		८		८ ८		०				

अष्टौ कर्माणि सूक्ष्मान्ता भुंजते मोहनं विना ।
शान्तक्षीणकषायाख्यावन्तिमौ घातिभिर्विना ॥ १३ ॥
८।८।८।८।८।८।८।८।८।७।७।४।४।
स्वस्थावस्थायामिति
उदीरयति घातीनि तत्स्था मोह समाहनौ[1] ।
वेद्यायुषी प्रमत्तान्ता योग्यता गोत्रनामनी ॥ १४ ॥
मताऽन्त्रायुषो मरणावस्थायामुदीरणा नास्ति[4] ।
तत:——
सत्त्वं मरणावस्था प्रमत्तान्ता अमिश्रकौ[5] ।
अष्टौ च सर्वदाऽमिश्रस्तस्य तस्यामभावत ॥ १५ ॥
पंच मोह विना सूक्ष्मः क्षीणा द्वे गोत्रनामनी ।
कर्मणी स्फुटमावस्थामुदीरयति निश्चितम् ॥ १६ ॥

८	५	८		१	६	१	६	५	५	२
५	५	५	५				५		२	

सत्ता कथ्यते,——
शान्तान्तषु समस्तानि सप्त मोहयुत परं ।
जिनयो सत्यघातीनि घातिकर्मविमुक्तयो ॥ १७ ॥

---

१ ज्ञानदर्शनान्तरायत्रयं । २ माहस्था । ३ सूक्ष्मान्ता मोहमुदीरयति । ४ मरणावस्थायामन्तर्मुहूर्तायुषि उदीरणा नास्ति । ५ मिश्रगुणस्थानवर्जिताः । ६ मिश्रस्य । ७ मरणावस्थायाम् । ८ सूक्ष्मसांपरायान्तं मोहविनापंचकर्मणामुदीरणा शेषकाले ऽप्यन्याम् । ९ क्षीणस्य पंच ।

तत्सद्दष्टिर्येषा——
८।८।८।८।८।८।८।८।८।८।८।७।४।४।
बंधहेतुः कथ्यते,——
सम्यक्त्वं तीर्थकपुल्वे पृषमाहारकैद्वय ।
बंधस्य हेतुरन्यपु मिथ्यात्वसंयमादय ॥ १८ ॥
बंधविच्छेदो भण्यते,——
एता पोडश दुर्दृष्टौ सासने पञ्चविंशति ।
द्वयाविरमण देश चतस्रः षट् प्रमादिनि ॥ १९ ॥
एकाग्रो द्व वतस्त्रिमवतस्र पंचपंचसु ।
सूक्ष्म पोडश विच्छिद्या पय मागिनि मपतः ॥ २० ॥
बंध सर्वाः प्रकृतयः १२० ।

एतास्तीर्थकराहारकद्वयहीना मिथ्यादृष्टौ सासने, सुरनरा-पुर्भ्यां विना मिश्रे, तीर्थकरनरसुरायुर्भि सहासंयत देश प्रमत्ते, आहारकद्वयेन सहाप्रमत्ते अपूर्वे, सप्तसु मागेषु बंधविच्छेदः, अनिवृत्ता पञ्चसु मागेषु, सूक्ष्मादिषु ।

मिथ्यादृष्टिगुण संदृष्टिरि-घस वं व्यु १६, बंध ११७, अबंध ३, अ २१ ।

सासने	मिश्रे	असंयत	देश	प्रमत्त	अप्रमत्त
२५		१	४	६	१
१ १	७४	७७	६७	६३	५९
१९	४६	४३	५३	५७	६१
४७	७४	७१	८१	८५	८९

१ सम्मेव तित्थयरो आहारदुगं पमादरहिदम्मि । गो क. । २ कर्म-ग्रन्थ् १४८ प्रकृत्यपेक्षया ।

अपूर्वे सप्तसु भागेषु

२			०		१	४
५८	५६	५६	५६	५६	५६	२६
६२	६४	६४	६४	६४	६४	६४
१	१२	१२	१२	१२	११	११२

अनिवृत्तौ पंचसु भागेषु

१	१	१	१	१
२२	२१	२	१६	१८
९	९९१		१	११०२
१२६	१२	१२	१२९	१३

सूक्ष्मादिषु पंचसु

सू	उ	क्षी	स	अ
१६			१	
१७	१	१	१	
१ १	११९	११९	११९	१२
११	१४७	१४	१४७	१४८

मिथ्यात्वादिषु व्यच्छिन्नप्रकृतय ।

आर्याच्छन्दः ।

मिथ्यात्वे षंढवेदः श्वभ्रायु श्वभ्रयुग्महुंडानि ।

आद्यं जातिचतुष्कं स्थावरसाधारणातपापूर्णाः ॥ २१ ॥

सूक्ष्म सहसिरस्या षंधान्मिथ्यास्वलब्धजन्मान ।

षोडश विच्छिद्यन्त मिथ्यादृष्टौ गुणस्थाने ॥ २२ ॥ युग्मम् ॥

आद्यकषायचतुष्क तिर्यग्द्वयतिर्यगायुरुद्योताः ।

दुर्भगदु स्वरमध्यमसहतिसस्थितिचतुष्कानि ॥ २३ ॥

सत्वानादेयेन स्त्री नीचं स्त्यानगृद्धयस्तिस्रः ।

अशुभविहायोरीतिर्विच्छिद्यन्ते द्वितीयगुणे ॥ २४ ॥ युग्मम् ॥

प्रथमकषायोदयजा एता पंचादभावतस्तेषां ।
रसंन पचविंशतिरुपरिष्टात्प्रकृतयस्तदभावात् ॥ २५ ॥
द्वितीयानां कषायाणां चतुष्कमादिसंहतिः ।
नृद्वयौदारिकद्वन्द्वे मनुष्यायुर्दशाग्रत ॥ २६ ॥
द्वितीयकषायोत्थाना एताः प्रकृतय स्फुटम् ।
प्रयपन्ते व्यवच्छेद परं तदभावत ॥ २७ ॥
तृतीयानां कषायाणां चतुष्कं याति विच्छिदम् ।
देशव्रते तदुत्थानामभावात्परतस्तत ॥ २८ ॥
अरत्यपत्रसी शोकअस्थिराशाताशुभानि षट् ।
प्रमत्ते यांति विच्छेदं सुरायुश्चाप्रमत्तके ॥ २९ ॥
अपूर्वे प्रथमे भागे द्वे निद्राप्रचले तत ।
षष्ठे प्रकृतयस्त्रिंशच्चतस्र सप्तमे ततः ॥ ३० ॥
तैजस कार्मणं पंचहृषीकममरद्वयम् ।
स्थिरं प्रथमसंस्थानं शुभं वैक्रियिकद्वयम् ॥ १ ॥
त्रसौघगुरुलघ्वादिवर्णादीनां चतुष्टयम् ।
सुभगं सुस्वराख्यं निर्माणं खगमागति ॥ ३२ ॥
आहारकद्वयं तीर्थकृत्त्वं त्रिंशदिमास्ततः ।
हास्य रतिर्जुगुप्सा भीभवस्तः सप्तम षडः ॥ ३३ ॥
पुंवेदोऽन्त्यकषायाणां चतुष्कं पंचपंचसु ।
भागेषु याति विच्छेदमनिवृत्तः क्रमादिमाः ॥ ३४ ॥
पंच ज्ञानावृतयश्च चतस्रो दर्शनावृतः ।
यशः पंचान्तरायस्य छिन्ना' सूक्ष्मे च षोडश ॥ ३५ ॥

---

१ पंचहृषीकं—पंचेन्द्रियं । २ त्रसबादरपर्याप्तप्रत्येकानि । ३ अगुरु-लघूपघातपरघातोच्छ्वासानि ।

अप्रमत्त	अपूर्वे	अनिवृत्ती	सूक्ष्म	उपशान्ति
४	६	६	१	२
७६	७२	६६	६०	५९
४६	५०	५६	६२	६३
७२	७६	८२	८८	८९

क्षीणे प्रथमसमय	द्वितीयसमय	सयोगे	अयोग	सर्वाः
२	१४	३०	१२	
५७	५५	४२	१२	
६५	६७	८०	११	१२२
९१	९३	१ ९	१३५	१४८

उदयविच्छेदमुक्त्वा प्रकृतय: कथ्यन्ते—

पचापर्याप्तिमिथ्यात्वसूक्ष्मासाधारणातपा: ।
मिथ्यादृष्टिगुणस्थाने प्रभ्रश्यन्त्युदयादिमा: ॥ ४१ ॥
चतस्रो जातय: पूर्वा: कषायाद्यचतुष्टयम् ।
स्थावरं चोदयाद्दत्ता नव भ्रश्यन्ति सासने ॥ ४२ ॥
सम्यग्मिथ्यात्वमेवैकं मिश्रे यात्युदयक्षयं ।
चतुर्देवायुषी दर्शन वैक्रियकद्वयम् ॥ ४३ ॥
नृतिर्यगानुपूर्व्यौ (द्व) दुर्भग नारकद्वयम् ।
द्वितीयानां कषायाणां चतुष्कमयशोयुतम् ॥ ४४ ॥
अनादेयमिमा: सप्तदश प्रकृतय: स्फुटम् ।
असयतगुणस्थाने स्वीकुर्वन्त्युदयक्षयम् ॥ ४५ ॥ विशेषकम् ॥
नीचगोत्रं तृतीयानां कषायाणां चतुष्टयम् ।
तिर्यग्मनुष्यायुषी अष्टौ देशे यान्त्युदयक्षयम् ॥ ४६ ॥
आहारकद्वयं स्त्यानगृद्धित्रयमिमा गुण ।
प्रमत्तसंयते पंच भयन्त्युदयतश्च्युतिम् ॥ ४७ ॥

विना सम्यक्त्वमिथ्यात्वेन सह मिश्रे, चतसृभिरानुपूर्वीभिः सम्यक्त्वेन च सहासंयते, देशे, आहारकद्वयेन सह प्रमत्ते, अप्रमत्तादिकेषु पदसु, तीर्थकरेण सह सयोगे,

तद्दर्शनप्रकारः——

मिथ्यात्वे	सासन	मिश्र	असंयत	देशे
५	९	१	१७	८
११७	१११	१	१ ४	८७
५	११	२२	१८	३५
३१	३७	४८	४४	६१

प्रमत्ते	अप्रमत्त	अपूर्वे	अनिवृत्तौ	सूक्ष्मे
८	४	६	६	६
८१	७३	६९	६३	५७
४१	४९	५३	५९	६५
६७	७५	७९	८५	९१

उपशान्ते	द्विचरम क्षीणे	चरमे	सयोगिनि	अयोगे
२	२	१४	३९	
५६	५४	५२	३९	०
९६	९८	७	८३	१२१
९२	९४	९६	१०९	१४८

सातासातमनुष्यायुः संयुक्ताः संस्युदीरणे ।
अष्टप्रकृतयः पंच प्रमत्तस्योदयस्थिताः ॥ ५८ ॥
सातासातनरायुर्भिर्विनोदयोदयप्रभवाः विना ।
सेति यागन एकोनचत्वारिंशदुदीरणे ॥ ५९ ॥
उदयोदीरणे तुल्ये भवतोऽन्येषु सर्वदा ।
श्रीभिरस्य गुणानेवान् प्रमत्तायोगयोगिनः ॥ ६० ॥

अनिवृत्तौ नवांशस्थित्सम्—

१६ / ११८	१२२	१ / ११४	१ / ११३	६ / १	१ / १	६ / १	१ / ५	१ / ४	१ / ५

	औपशमिकसम्यक्त्वे		
अविरत–	१४८	×	१
देशविरत	१४७	१	१
प्रमत्त वि.	१४६	२	×
अप्रमत्त	१४६	२	×
अपूर्वकरण उ.	१४६	२	×
अनिवृत्तिकरण उ.	१४१	२	×
सूक्ष्मसांपराय	१४१	२	×
उपशान्त	१४१	२	×
	क्षायिकसम्यक्त्वे		
अविरत	१४१	७	२
देशविरत	११६	६	×
प्रमत्त	११६	६	×
अप्रमत्त	११६	६	×
अपूर्व उ.	११५	६	×
अनि. उ.	११६	६	×
सूक्ष्म उ.	११९	६	×
उपशान्त	११६	६	×
अपूर्व क्षपक	११	१	×
अनिवृत्ति क्षपक	११८–१२२–११४ ११३–११२–१ ६ १ ५–१ ४–१ ३ १ २	१ –२६–३४–३५ ३६–४१–४३–४४ ४५–४६	१६–८ १–१–६– १ १ १ १
सूक्ष्म	१ २–	४६	१
क्षीण	१ १	४७	१६
सयोगकेवली	५	६१	×
अयोगकेवली द्वि.	८५	६३	५२
„ च.	१३	११५	११

ताव ज्जो लहु उग्गइ अप्पा झायइ जो णिग्गंथा ।
अह कट्ठो अह मूढो संकप्पवियप्पयं मुयई ॥
तंपो कोवि ण तारइ कट्ठो मूढो तहव णिग्गिच्छो ।
अप्पा तारइ अप्पा तम्हा अप्पावि झायहि ॥
पिच्छे ण हु सम्मत्तं करगहिए चमरमोरडंबरए ।
समभावे जिणदिट्ठं रायाईदोसचत्तेण ॥

अमितगत्याचार्यनिर्मिता निम्नलिखितनामानो ग्रन्थाः सन्ति ।

१ धर्मपरीक्षा
२ सुभाषितरत्नसंदोह
३ भावनाद्वात्रिंशति
४ श्रावकाचार
५ जम्बूद्वीपप्रज्ञप्तिः
६ चन्द्रप्रज्ञप्तिः
७ सार्द्धद्वयद्वीपप्रज्ञप्तिः
८ व्याख्याप्रज्ञप्ति
९ योगसारप्राभृत
१० पञ्चसंग्रह.
११ सामायिकपाठः

तत्र धर्मपरीक्षा सुभाषितरत्नसंदोहभावनाद्वात्रिंशतियोगसारप्राभृत श्रावकाचारसामायिकपाठ ग्रन्था मुद्रिता सन्ति । पञ्चसंग्रहस्तु हस्तलिपस्थ । शेषा ग्रन्थाग्रन्था नोपलभ्यन्ते । अयं रचनासंदोहः कथं सर्वं मुनीनिपाणित्वं व्यनक्ति ।

---

१ तावत् कश्चित् लघु लगनु आत्मानं ध्यायतु यतिनिर्ग्रन्थः ।
अथ कष्टः अथ मूढः संकल्पविकल्पकं त्यजन ॥
तपः कोपि न तारयति कष्टो मूढः तथैव निर्ग्रन्थः ।
आत्मा तारयति आत्मानं तस्मात् आत्मानं अपि ध्यायत ॥
पिच्छे न हि सम्यक्त्वं करगृहीते चमरमयूरडंबरे ।
समभावे जिनेन दृष्टं रागादिदोषत्यक्तेन ॥

२ सामायिक पाठ इति नाम्ना भावनाद्वात्रिंशती पृथक् मुद्रितास्ति अथच सामायिकपाठस्यान्यस्य सविस्तरस्य प्रकाशितपाठस्य सिद्धान्तसारादिसंग्रहे संपादितः । अस्मिन्नर्वाचीनसामायिकपाठे (१२१) श्लोकाः सन्ति ।

सूक्ष्मसांपराय—१ । १०२ ।

उपशान्त	क्षी.	क्षी.	क्षी.	अयोग प्रथमसमय	अयोग द्विचरमसमय
	१	१४			
	१ १	११	८५	७२	१३
१०२				८	१३

अथवा द्वितीयो विकल्प ——

मनुष्यतिर्यक्सुरायुर्हीना मिथ्यादृष्टौ ०, १४५, ३ ।

"न सत्याहारकद्वन्द्व न तीर्थकृदपि सासन" इति वचना दाहारकतीर्थकरहीना सासने , १४२, ६ ।

"नेति तिर्यक्त्वमिश्रत्व सत्त्वे तीर्थकृता सदा" इति वचना दाहारकद्वयेन सह तीर्थकरेण विना मिश्र ०, १४४, ४ ।

तीर्थकरेण सहासंयत ७, १४५, ३ । देशे ७, १४५, ३ । प्रमत्त ७, १४५, ३ । अप्रमत्त ७, १४५, ३ । अपूर्वे ०, १३८, १० ।

अनिवृत्ता नवांशेषु इत्थम्—

११	८	१	१	६	१	१	१	१
११	११२	११४	११३	११२,१	१	१	५१	७१ १
१	११	१७	१५	१६	७१	७३	७७	७५

सूक्ष्म	उपशान्ते	क्षीण १	क्षीण २	सयोगे	अयोग १	अयोग २
१	०	९	१४	०	७२	१३
१०२	१३८	१०१	९९	८०	८५	१३
४६	१०	४७	४९	६३	६३	१२५

१ अनिबद्धायुष्क [illegible] सपुकर्मणः । असंयतगुणस्थाने नारकायु सर्व [illegible] तिर्यगायु सर्व याति गुणस्थान तु पंचम । [illegible] [illegible] सप्तकम् । [illegible] साधु सर्व [illegible] । धर्मध्यान [illegible] ।

प्रशस्यापशनभेमर्पो मिथ्यात्वं विगाहत ।
तस्य प्रकृतय साटामस्मारिंशच्छतममा' ॥ ६६ ॥
अयऽन्यजन्मनि क्षीण श्वभ्रतिर्यक्सुरायुषाम् ।
सत्क्षया नृभवे प्राप्ते गुणस्थानेषु कथ्यते ॥ ६७ ॥
स्त्यानगृद्धित्रयं तिर्यग्द्वितयं नारकद्वयम् ।
सूक्ष्म साधारणोद्योतातापजातिचतुष्टयम् ॥ ६८ ॥
आतप स्थावरा शेषा षोडश प्रथमे क्षण ।
अनिवृत्तेर्द्वितीयेंशऽष्टकषाया मध्यमास्तत ॥ ६९ ॥
षडवदो वधूवेदो हास्यषट्कं क्रमाच्चतः ।
पुंवेदोऽथ स्वतः क्रोधो मानाख्यो मायना ततः ॥ ७० ॥
अनिवृत्तौ १६।८।१।१।६।१।१।१।१।
सूक्ष्मे लोभसूक्ष्मान्तो द्वे निद्राप्रचले क्षण ।
आद्ये क्षीणान्तिमे ज्ञानदर्शनाम्नायचतुर्दश ॥ ७१ ॥
१ । २ । १४ ।
अयोगस्य शरीराणि पंच बंधनपंचकम् ।
संघातपंचकं षट्कं संस्थानानां सुरद्वयम् ॥ ७२ ॥
त्रीण्यंगोपांगकान्यष्टौ स्पर्शा' संहननानि षट् ।
अपर्याप्तं रसाः पंच द्वौ गंधौ वर्णपंचकम् ॥ ७३ ॥
अयशोगुरुलघ्वादिचतुष्कं द्वे नभोगती ।
स्थिरास्थिरं शुभाशुभं प्रत्येक सुस्वरद्वयम् ॥ ७४ ॥
वेद्यमेकमनादेयं नीचदुर्भगनिर्मितं ।
उपान्त्यसमये क्षीणा' द्वासप्ततिरिमा' समम् ॥ ७५ ॥
७२ प्रकृतयः ।

अस्ये यच्च द्वयोरेकं नगयुग्मद्वय प्रसम् ।
सुभगादेयपर्याप्तयथार्ह तीर्थकर्तृता ॥ ७६ ॥
वाद्रगाश्चयशःसीतिं त्रयोदश क्षणे क्षयम् ।
यस्य प्रकृतया याति तमयोगं स्तुवे त्रिधा ॥ ७७ ॥
१३ प्रकृतय ।

किं प्राक् विच्छिद्यते बंध किं पाक' किमुभौ समम् ।
किं स्वपाकन बंधोऽन्यपाकेनोभयथापि किम् ॥ ७८ ॥
सान्तराऽनंतर' किं किं बंधो द्विधा प्रबंधत ।
इत्येवं नवधा प्रश्नक्रमेणास्त्यतदुत्तरम् ॥ ७९ ॥
देवायुर्वैक्रियद्वन्द्व देवाहारद्वयेऽस्यगः ।
इत्यष्टानां पुरा पाके पश्चाद्बंधो विनश्यति ॥ ८० ॥

अत्रप्रथमत बंधाच्छेदगुणस्थानांकर्मम्या, पश्चादुदयवि च्छेदगुणस्थानांकर्मम्या द्रष्टव्या—

देवायुष —बंध, गु ७, गु ४, उदय । वैक्रियिकद्वयस्य– ८, ४ । देवद्वयस्य–८, ४ । आहारकद्वयस्य–८, ६ । अयश'कीर्ते –६, ४ ।

हास्यरतिजुगुप्साभीतिमिथ्यापुंस्याबरातपा ।
साधारणमपर्याप्तं सूक्ष्मं जातिचतुष्टयम् ॥ ८१ ॥
कोपादयास्त्रिसंज्वाललाभामस्यानुपूर्विका ।
इत्येकत्रिंशतो बंधपाकच्छेदौ समं मतौ ॥ ८२ ॥

एकस्मिन् गुणस्थान बंधपाकद्वयादेशनाष्टेषपार्कां समं द्रष्टव्यौ । हास्यस्य ८, ८ । अरते ८, ८ । जुगुप्साया' ८,

१ प्रथमम उदयविच्छेद पश्चाद्बंधविच्छेदो भवति ।

८ । भयस्य ८, ८ । मिथ्यात्वस्य १, १ । पुंवेदस्य ९, ९ । स्थावरस्य १, १ । आतपस्य १, १ । साधारणस्य १, १ । अपर्याप्तस्य १, १ । सूक्ष्मस्य १, १ । जातिचतुष्टयस्य १, १ । यद्यपि सासन जातिचतुष्टयस्योदयस्तथापि न दोष स्तस्य मिथ्यादृष्टिसदृशत्वात् । नरानुपूर्व्याः ४, ४ । अनंतानुबंधिचतुष्टयस्य २, २ । अप्रत्याख्यानचतुष्टयस्य ४, ४ । प्रत्याख्यानचतुष्कस्य ५, ५ । कार्यसंज्वलनस्य ९, ९ ।

मनुष्वीनां तु शेषाणामकाशीतेः शरीरिव ।
पूर्वं विच्छिद्यते बंध पश्चात्साकस्य विच्छिन्न ॥ ८३ ॥
यशोवरायदृक्ज्ञानराधगात्रमयायश्च ।
लोकारम्भत्वलामां कीर्तत्रीषविचापिता ॥ ८४ ॥
भनरतिर्मेस्नरार्येपि मनतिपञ्चरीवय ।
तियङ्ग्व्यानुपूर्व्या द्व पंचार्थादारिकद्वये ॥ ८५ ॥
पञ्चाघगुरुलघ्वादिनसादीनां चतुष्टयम् ।
षट्ट सस्थानसहस्योश्यासा द्व नभोगती ॥ ८६ ॥
स्थिरादिषयुग्मानि निर्मितर्मसकामणे ।
एकाशीत युग बंधः पश्चात्याको विनश्यति ॥ ८७ ॥

अत्रप्रथमत पाकोच्छेदगणनांकसंख्या, पश्चात्तु बधच्छद-गुणस्थानांकसंख्या द्रष्टव्या—

पंचानां ज्ञानावरणानां, चतुर्णां दर्शनावरणानां, पंचानामन्तरायाणां—पाकच्छेदः १२, बंधच्छेद १० । यशःकीर्त्युच्चगोत्रयोः १४, १० । स्त्यानगृद्धित्रयस्य ६, २ । निद्राप्रच-

१ मान माया संज्वलनस्यापि ९, ९ । २ उपशमकाः ।

लभो: १२, ८ । सद्वेद्यस्य १४, १३ । असद्वेद्यस्य १४, ६ । सञ्ज्वलनलोभस्य १०, ९ । स्त्रीवेदस्य ९, २ । नपुंसकवेदस्य ९, १ । अरतिशोकयो ८, ६ । नरकायुष ४, १ । तिर्यगायुष ५, २ । मनुष्यायुष १४, ४ । नरकगते ४, १ । तिर्यग्गते ५, २ । मनुष्यगते १४, ४ । पंचेन्द्रियजाते १४, ८ । औदारिकशरीरस्य १३, ४ । तैजसस्य १३, ८ । कार्मणस्य १३, ८ । समचतुरस्रसंस्थानस्य १३, ८ । मध्यम संस्थानचतुष्टयस्य १३, २ । हुंडस्य १३, १ । औदारिकशरीराङ्गोपांगस्य १३, ४ । वज्रर्षभनाराचसंहननस्य १३, ४ । वज्रनाराचनाराचयो ११, २ । अर्द्धनाराचकीलकसंहननयो ७ २ । असंप्राप्तासृपाटिकासंहननस्य ७, १ । वर्णादिचतुष्टयस्य १३, ८ । नरकगत्यानुपूर्व्या ४, १ । तिर्यग्गत्यानुपूर्व्या ४, २ । अगुरुलघ्वादिचतुष्टयस्य १३, ८ । उद्योतस्य ५, २ । प्रशस्तविहायोगते १३, ८ । अप्रशस्तविहायोगते १३, २ । त्रसबादरपर्याप्ताना १४, ८ । प्रत्येकशरीरस्य १३, ८ । स्थिरस्य १३, ८ । अस्थिरस्य १३, ६ । शुभस्य १३, ८ । अशुभस्य १३, ६ । सुभगस्य १४, ८ । दुर्भगस्य ४, २ । सुस्वरस्य १३, ८ । दु स्वरस्य १३, २ । आदेयस्य १३, ८ । अनादेयस्य ४, २ । निर्माणस्य १३, ८ । तीर्थविधायिताया १४, ८ । नीचस्य ५, २ ।

इति सत्प्रकार ।

विक्रियापट्कमाहारद्वय श्वभ्रामरायुषी ।
मीर्यकृन्मति बध्यते एकादशपरोदयात् ॥ ८८ ॥

नरकगतिनरकगत्यानुपूर्वी देवगतिदेवगत्यानुपूर्वी वैक्रियिकशरीरवैक्रियिकशरीरांगोपांगानां षण्णां बंधयोग्येषु गुणेषु परोदयेन बंध, स्वोदयेन बंधस्य विरोधादाहारकद्वयमपि परोदयेन बध्यते । आहारकद्वयादयरहितयोरप्रमत्तापूर्वयोर्बंधोपलंभात् । नारकामरायुषोरपि परोदयेन बंधस्तत्स्वोदययोः समानकाल वृत्तिविरोधात् । तीर्थकरनाम्नोऽपि परोदयेन बंध तीर्थंकरकर्मोदयसमविगुणस्थानयाः सयोगायोगयोस्तद्बंधानुपलंभात् ।

ज्ञानावृत्त्यंतरायस्था दश तैजसकार्मण ।
शुभस्थिरद्वय वर्णचतुष्कं स्वचतुष्टयम् ॥ ८९ ॥
निर्माणागुरुलघ्वाह्व मिथ्यात्वं सप्तविंशति ।
बध्यन्ते स्वोदयाच्छेषा द्व्यशीतिः स्वपरोदयात् ॥ ९० ॥

ज्ञानावरणान्तरायस्था दश प्रकृतयो, दर्शनावरणस्य चतस्रः, बंधयोग्येषु गुणस्थानेषु स्वोदयेन बध्यन्ते । मिथ्यादृष्टयादि क्षीणकषायान्तपर्यन्तासां निरन्तरोदयोपलंभात् । तैजसकार्मण वर्णगंधरसस्पर्शनिर्माणागुरुलघुस्थिरास्थिरशुभाशुभानि स्वोदयेनैव बध्यन्ते, ध्रुवोदयत्वात् । मिथ्यात्वस्यापि स्वोदयेनैव बंधो, मिथ्यात्वकारणपाठप्रमकृतिषु पाठात्, बंधोदययोः समानकाल वृत्तिविरोधाभावाद्वा । दर्शनावरणपंचकवेदत्रय-कषायषोडशकनाकषायतिर्यगायुर्मनुष्यायुस्तिर्यग्गतिमनुष्यगत्येकद्वित्रिचतुःपंचेन्द्रियजात्यादारिकौदारिकांगोपांगसंस्थान

१ यत कारणात् तयोरुदयकाले बंधो न भवति बंधकाले उदयो न भवति इ त्यन्योन्यं विरोधो ज्ञेय. ।

पट्संहननपट्कतिर्यग्गतिमनुष्यगतिमायोग्यानुपूर्व्युपघातपरघातो च्छ्वासातपोद्योतप्रशस्ताप्रशस्तविहायोगतित्रसस्थावरबादरसूक्ष्मपर्याप्तापर्याप्तप्रत्येकसाधारणसुभगदुर्भगसुस्वरादेयानादेययश कीर्त्ययशःकीर्तिनीचोच्चगोत्रनामिकानां द्व्यशीतिप्रकृतीनां स्वपरोदयाद्बन्धो द्रष्टव्यः, स्वोदयेनेव परोदयेनापि बन्धावि रोधात् ।

कषाया सकला सर्वा ज्ञानदृष्टयन्तरायगा ।
उपघातजुगुप्से भीर्मिथ्यात्वतैजसकार्मणे ॥ ९१ ॥
निर्माणागुरुलघ्वाढ़े वर्णादीनां चतुष्टयम् ।
ध्रुवबंधा मता सप्तचत्वारिंशदिमा जिनैः ॥ ९२ ॥

ध्रुवबंधत्वमेतासां बंधयोग्यगुणस्थान नित्य बंधोपलंभात् ।

आयुश्चतुष्टयाहारकद्वयतीर्थकरैर्युता ।
चतु पंचाशदेताश्च बंधं यांति निरन्तरम् ॥ ९३ ॥

ध्रुवबंधस्य निरन्तरबंधस्य च को विशेष ? महान् विशेषो यत —

बंधयोग्यगुणस्थाने या स्वकारणसन्निधौ ।
सर्वकालं प्रबध्यन्ते ध्रुवबन्धा भवन्ति ताः ॥ ९४ ॥
बन्धकालो जघन्योऽपि यासामन्तर्मुहूर्तकः ।
बध्यमानास्थितस्तत्र ता निरन्तरबंधना ॥ ९५ ॥
अन्त्य संहतिसंस्थानपंचक स्थावरगतयो ।
पंढवेदो वधूवेद आद्य जातिचतुष्टयम् ॥ ९६ ॥
न्यग्गोत्रयशुभोद्योतसूक्ष्मसाधारणातपम् ।
अस्थिरासुभभोरीतिदुर्भगाभूणदुःस्वरा ॥ ९७ ॥

श्वभ्रद्वयमनादेयासाते त्रिकचतुर्युताः ।
बध्यन्ते सांतरा बंधेऽन्या सान्तरनिरन्तरा ॥ ९८ ॥
बंधो भूत्वा क्षणं यासामसमाप्तो निवर्तते ।
बंधापूर्वे क्षणेनैता सांतरा विनिवेदिताः ॥ ९९ ॥
अन्तर्मुहूर्तमात्रस्याजघन्यस्यापि कर्मणाम् ।
सर्वेषां बंधकालस्य बंधः सामयिकोऽस्ति नो ॥ १०० ॥
तिर्यग्द्वयं नरद्वन्द्वं पुवेदौदारिकद्वये ।
गोत्रे सातं सुरद्वन्द्वे पंचाद्यं पंक्तिमद्वयम् ॥ १०१ ॥
पराघातं रतिर्हास्यमाद्यं सस्थानसंहती ।
वज्र त्रसादियुग्मानामाद्यान्युच्चगसस्थवी ॥ १०२ ॥
द्वात्रिंशदिति जायंते ता सांतरनिरन्तराः ।
यस्मादुभययोर्बंधः सर्वदाप्युपलभ्यते ॥ १०३ ॥
उपनुत्से न भवति तज्जघन्यकालमिद्धः ।
तीर्थंकरद्वये साधुनाहारार्द्दे कदाचन ॥ १०४ ॥
मिथ्यात्वभावता यातु मिथ्यात्ववलभाविषु ।
सासनो यावत नैव भावतजानिसीगिषु ॥ १०५ ॥

बंधादयादीरयमसत्वयार्णा,
विचारणां यो विदधाति निरयम् ।
विविक्तमारभानमपास्तकर्मा,
ज्ञानात्मकं सोऽमितगत्युपैति ॥ १ ६ ॥

इति श्रीमदमितगत्याचार्यप्रणीते पंचसंग्रहग्रन्थे
कर्मबंधस्तवाख्यस्तृतीयः
परिच्छेदः ।

---

१ द्वात्रिंशत् । २ एकसमयवर्ती । ३ सांतरोऽपि निरंतरोऽपि बंधः ५४, निरन्तरबंध ३४ सांतरबंध ३१, एवं १ ।

अथ चतुर्थ परिच्छेद ।

जयताञ्जनितानंद जिनेन्द्रवचनामृतम् ।
जन्ममृत्युजरातृष्णाश्रमतापापनोदनम् ॥ १ ॥
दृष्टिवादादपोद्धृत्य वक्ष्यन्त सारमागिन ।
श्लोका जीवगुणस्थानगाथरा कतिचिन्मया ॥ २ ॥

ये सन्ति यस्मिन्नुपयोगयोगा ,
समस्तमस्ताभिगदामि तत्र ।
जीवे गुणे वा परिणामतोऽह
मकत्र यथाविधिर्वि च किंचित् ॥ ३ ॥

सर्वेकाक्षेषु चत्वारि जीवानां विकलेषु षट् ।
पंचेन्द्रियेषु चत्वारि स्थानानीति चतुर्दश ॥ ४ ॥
तिर्यग्गतावथाप्यामि द्वे सत्रिस्थे गतित्रये ।
जीवस्थानानि नयानि मंन्येर्म मार्गणास्वपि ॥ ५ ॥

न १	ति १४	म १	इं २	[illegible] ४	ज्ञा ७	चा २
व २	प. ४	इ ४	अ. ४	ग ४	पाप ४	व ४
अत १	स. म १	अस म १	र म	अनु म १	ख व १	अस व १
उ व १	अनु व	भो	भो. मि. ८	वे. १	वे मि १	आ १
आ. मि. १	भा	ला ४	पु ४	न १४	भ्रमे १४	मा १४
माया १४	लोभ १४	सुम १४	पुमु १४	विमग १	म २	मु २

म	मन	व	भाषा	काय	वारि.	सूक्ष्म
२	१	१	१	१	१	१
कषा.	क्रोध	अस	च	मिश्र च	असमु	अच.
१	१	१४	१	१	१४	१
के	कृष्ण	नील	कापोत	तेजो	पद्म	शु.
१	१४	१	१४	२	२	१
भ	अ	क्षयो क्ष	औ मिश्र	वेदक	सा.	सम्यग्
१४	१४	१	२	२	२	१
सा मि मिश्र	मिथ्या	संज्ञी	अस	अ. मि	भव्य	अनाहा
१	१४	२	२	१२	१४	८

एतत्प्रकारः सूच्यते——

अक्षमानवद्वेषु द्वा द्वौ सज्ञिपर्याप्तापर्याप्तौ, तिर्यक्षु चतु-र्दशापि जीवसमासा', एकाक्ष बादरसूक्ष्मपूर्णापूर्णाश्चत्वार', द्वित्रिचतुरक्षेषु निजौ पर्याप्तापर्याप्तौ द्वौ, पंचाक्ष सज्ञ्यसंज्ञिपर्या-प्तापर्याप्ताश्चत्वार , पंचस्थावरकायेषु प्रत्येकं प्रथमाश्चत्वारः, त्रसकायेषु द्वयक्षाद्या दश, आद्येषु सप्तसु योगेषु एकः संज्ञी पूर्ण , अष्टम तु पंच द्वयक्षाद्या' पर्याप्ता', औदारिक सप्त पर्याप्ता', मिश्र सप्तापर्याप्ताः 'संज्ञिपर्याप्तोऽष्टम', वैक्रियिका-हारकाहारकमिश्रेष्वेकः संज्ञी पर्याप्त', वैक्रियिकमिश्र संज्ञ्यप-र्याप्त', कार्मणे सप्तापर्याप्ता' संज्ञिपर्याप्तोऽष्टम , स्त्रीपुंवेदयो' संज्ञ्यसंज्ञिपूर्णापूर्णाश्चत्वार', षंढवद सर्वे, कषायचतुष्के समस्ताः, मतिश्रुताज्ञानयोर्निरूपा , विभंग संज्ञ्येक पूर्ण , मति श्रुतावधिषु संज्ञिपूर्णापूर्णौ, मन'पर्ययकेवलयो संज्ञ्येक' पूर्ण', संयमपंचकदेशसंयमधारकः संज्ञीपूर्णः, असंयम सकलाः,

---

१ सयोगकेवलिनि । २ १ सयोगकेवलिनि ।

जीवभंगो जिनेन्द्रक पुद्गलाद्याविहायसाम् ।
अनंतगुणितं पूर्वं पैरतः परत परम् ॥ ८ ॥
गदिता द्रव्यताऽसंख्यौ धर्माधर्मौ प्रदेशत ।
क्षेत्रतो लोकमानौ तौ लोकं व्याप्य यत स्थितौ ॥ ९ ॥
अतीतानहसाऽनन्तभागौ तौ कालतः स्मृतौ ।
[1]भावत कपलानन्तभागौ कवलसोपर्त ॥ १० ॥
विज्ञातव्या गुणाजीवाः प्राणपर्याप्तिमार्गणाः ।
उपयोगा पृथः सम्रा विंशतिर्जीवरूपणा ॥ ११ ॥
जीवा यैरवबुध्यन्त भावैरौदयिकादिभि ।
गुणागुणस्वरूपज्ञस्य त गदिता गुणा ॥ १२ ॥
जन्वारौदयिकाः नाथि क्षायिकः क्षामिको जिनै ।
क्षायोपशमिको भाव स्वतत्त्वं पारिणामिक ॥ १३ ॥

---

१ अव...म परस्पर गुणितमनन्तगुणम । २ १८-१८-१ -९-१८ ... (८-५-९-१५-३-१९-८-७-४-९-२-९-२-२) १२-८ । ...१४ ५८ [illegible] ।

[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]
[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]
[illegible]	१ १	१ १ १	१	[illegible] १	[illegible]
[illegible]	१ १	१ १ १	१ १ १ १	१	१
[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]

चक्षुर्दर्शने चतुरक्षाद्या पर्याप्तास्सम', विग्रहगत्यपेक्षया पट्टे पर्याप्तापर्याप्ता , अचक्षुदर्शन सर्वे, अवधिदर्शन सञ्ज्ञिपर्याप्तापर्याप्तौ द्वौ, केवलदर्शन पूर्ण सइपकः, कृष्णनीलकापोतासु सर्वे, पीतपद्मशुक्लल्स्यासु संज्ञिपूर्णापूर्णौ द्वौ, भव्याभव्ययो. प्रत्येकमशेषा', औपशमिकदर्शने सञ्येक , विग्रहगत्यपेक्षया पूर्णापूर्णा द्वौ सञ्ज्ञिनौ, वेदकक्षायिकसासनेषु सञ्ज्ञिपूर्णापूर्णौ, सासने तु विग्रहगत्यपक्षया सप्तोपर्याप्ताः सञ्ज्ञीपूर्णो एम', मिश्रे सञ्येक पूर्ण', मिथ्यादृष्टौ सर्वे, सञ्ज्ञिनि द्वौ सञ्ज्ञिपूर्णापूर्णा।, असंज्ञिनि द्वादशसञ्ज्ञिनी पूर्णापूर्णौ, विग्रहगत्यपक्षया द्वादश सञ्ज्ञिपूर्णापूर्णवर्जिताः, आहारके समस्ता', अनाहारक सप्तापर्याप्ता सञ्ज्ञिपर्याप्ताऽष्टम । एव मार्गणासु जीवसमासा योजिता ।

मार्गणायां गुणस्थानानि ।

सर्वाणि नृगतौ पञ्च तिर्यक्षु भाभ्रदयया ।
गुणस्थानानि चत्वारि मार्गणास्वपरास्विति ॥ ६ ॥

नरक ४	ति ५	मनु १४	देव ४	एके १	द्वी २	भान्द्र २
वायु १	पञ्चे १४	पृथ्वी १	अपकाय १	तेजः १	वनु १	त्रस. २
मन १४	स म १३	अ म १२	उभय म १२	अनु. म. १३	स. व. १३	अ व. १२
उ व १२	अ व १३	औ १३	औ. मि. ४	वै ४	वै. मि १	आ. १

१ " नहिसासणो अपुण्णो साहारण सहुममेयतउजुग " इति गाम्मट सारवचनात् सूक्ष्मापर्याप्तकभेदो नास्ति इत्यत्र चिन्तनीयम् ।

आ मि	का.	स्त्री	पु	नपुंस	क्रो	मान		
१	४	९	९	९	९	९		
माया	लो.	कुम	कुश्रु	वि	म.	श्रु		
९	१०	२	२	२	९	९		
अ.	मनः	के	सम	छेदो.	परि.	सूक्ष्म		
९	७	२	४	४	२	१		
यथा	दे	असं.	च	अ.	अव	के		
४	१	४	१२	१२	९	२		
कृष्ण	नील.	कापो.	तेजो.	पद्म	शु	भ	अभ.	भो
४	४	४	७	७	११	१२	१	
वेदक	क्षा.	सा.	मिश्र.	मि	सं	अ	आ.	अन
४	११	१	१	१	११	२	११	५

तत्प्रकारः सूच्यते——

नारकसुखाधिकपाश्रस्यायानि गुणस्थानानि, तिर्यक्षु पंच, मनुष्येषु सर्वाणि, एकद्वित्रिचतुरक्षेषु द्व प्रथमे, पचाक्षेषु समस्तानि, धराधारिवनस्पतिकायेषु द्व प्रथमे, तेजोवातकाये योरेकमाद्य, त्रसेषु चतुर्दश, मनोवचनयोगयोराद्ययोरन्त्ययो रौदारिककाययोग च त्रयोदश सयोग्यन्तानि, मध्यमयो क्षीणान्तानि द्वादश, कार्मणौदारिकमिश्रयो' प्रथमद्वितीयचतुर्थ सयोग्याख्यानि चत्वारि, वैक्रियिके प्रथमानि चत्वारि, तन्मिश्रे मिश्र विना त्रीणि, आहारकाहारकमिश्रकयोरेकं प्रम त्ताख्यं, वेदत्रिके प्रत्येकं नवाद्यानि, आद्यकषायत्रिके नवाद्यानि, लोभे दश, अज्ञानत्रये द्वे मिथ्यादृष्टिसासने, प्रथमे ज्ञानत्रये प्रत्येक नवासंयतादीनि, मनःपर्यये प्रमत्तादिक्षीण कषायान्तानि सप्त, केवले द्वे अंत्ये, सामायिकच्छेदोपस्थापन-याश्चत्वारि प्रमत्तादीनि, परिहारे द्व प्रमत्ताप्रमत्ते, एकं सूक्ष्म

सूक्ष्मकषायास्म्य, यथाख्याते चत्वार्युपशान्तादीनि, एकं संयमासंयमे पंचमं, असंयमे चत्वार्याद्यानि, चक्षुर्दर्शनाचक्षुर्दर्शनयोर्द्वादशाद्यानि, अवधिदर्शने नवासंयतादीनि, केवलदर्शने द्वे अन्त्ये, आद्ये लेश्यात्रये चत्वार्याद्यानि, तेजःपद्मयोराद्यानि सप्त, शुक्लायां त्रयोदश समाप्यन्तानि, द्वादशाद्यानि भव्ये, एकममव्ये प्रथमं, औपशमिकेऽष्टासंयतादीनि, वेदके चत्वार्यसंयतादीनि, क्षायिके चतुर्थादीन्येकादश, सासनमिश्रमिथ्यादृष्टिषु प्रत्येकमेकं स्वकीयं, संज्ञिनि द्वादश क्षीणान्तानि, असंज्ञिनि द्वे प्रथमे, आहारके त्रयोदशाद्यानि मिथ्यादृष्टिसासनाविरतयोग्ययोग्याख्यानि पंचानाहारके । एवं मार्गणासु गुणस्थानानि मार्जितानि ।

संति मर्त्यगतौ सर्वे नवान्यासु विना त्रिभि" ।
नवस्था मार्गणास्वेवमुपयोगा यथाक्रमम् ॥ ७ ॥

नारक	ति.	मनु.	देव.	ए.	द्वी.	त्री.
४	४	१२	४	१	१	१
चतु	प	पृ	अप्	तेजो	वायु	व
४	१२	१	१	१	१	१
मन	व म	अन म	उ म	अनु म	स. व	अ. व
१२	१२	१४	१	१२	१२	१०
उ व	अ. व	आ	मिश्र	व	मिश्र	अ.
१	१२	१३	४	४	७	६
मिश्र	का.	ना	पु	नपुं.	क्रो.	मा.
४	४	४	१०	४	१	१
माया	लोभ	कुम	कुश्रु	विभ.	म.	श्रु
१	१	५	५	५	७	७
अ.	मनः	के	साम्प.	छेदो	परि.	सू.
७	७	२		७	६	७

सम्य	संय.	भव	च	अ	अव	केव.
९	६	९	१	१	७	१

त्र.	भौ.	का.	तेजो.	व	पु.	म	अ.	औ.
९	९	९	१	१	१२	१	५	६

वेद	स्त्री.	सा	मिश्र	लि	सं.	भ.	आ.	अ
७	९	५	६	५	१	४	१२	९

तत्प्रकार: सूच्यते——

केवलद्वयमनःपर्ययवर्जिता नवोपयोगा प्रथमतिर्यक्षु मनुष्येषु सर्वे, मत्यज्ञानश्रुताज्ञानाचक्षुर्दर्शनान्येकद्वित्र्यक्षेषु सागारश्च, चतुरक्षेषु चक्षुर्दर्शनाधिकास्ते चत्वारः, पंचाक्षेषु द्वादश, पृथिव्यप्तेजोवायुवनस्पतिष्वकायाकाराश्च, त्रसेषु सर्वे, मनोवचोयोगपाराययारन्त्ययोश्च द्वादश, मध्यमयोः केवलद्वयहीना दश, औदारिके निखिलाः, तन्मिश्रकार्मणयो मनःपर्ययविभंगचक्षुर्दर्शनहीना नव, वैक्रियिके मनःपर्ययकेवलद्वयहीना नव, तन्मिश्रे मनःपर्ययकेवलद्वयविभंगचक्षुर्दर्शनहीना सप्त, आहारकद्वये प्रथमज्ञानत्रयचक्षुरचक्षुरवधिदर्शनानि षट्, स्त्रीपंढवेदयोस्तुर्यज्ञानकेवलद्वयवर्जिता नव, पुंवेदे विकलत्रया दश, चतुर्षु कषायेषु पुंवेदोक्ता दश, त्रिष्वज्ञानेष्वज्ञानत्रिकचक्षुरचक्षुर्दर्शनानि पंच, प्रथमज्ञानचतुष्के केवलद्वयाज्ञानत्रिकहीना सप्त, केवले केवलद्वयं, सामायिकछेदोपस्थापनसूक्ष्मसाम्परायेष्वज्ञानत्रिककेवलद्वयहीना सप्त, परि

१ आहारकयोगिमिश्रयोर्मुनेः मनःपर्ययाभावात् तदुक्तं गोम्मटसारजीवकाण्डे " मनःपर्ययपरिहारे पढमुवसमसम्मत्तदोण्णिमभावाए । एदेसु पक्कमं ... विभसर्व आसे " । २ मनःपर्ययज्ञानिनो मुनेः ... तदुक्तं मो कर्मकाण्डे मणपज्जवपरिहारे ... ।

हारकेऽसंयमयोराद्यज्ञानत्रयचक्षुरचक्षुरवधिदर्शनानि षट्, यथाख्याते पंचज्ञानचतुर्दर्शनानि नव, असंयमे तुर्यरोध केवलद्वयहीना नव, चक्षुरचक्षुर्दर्शनयोर्द्विके केवलद्वयहीना दश, अवधिदर्शने केवलयुग्माज्ञानत्रिकहीना' सप्त, केवले केवलद्वयं, आद्यलेश्यात्रये केवलद्वयचतुर्यथाख्यातहीना नव, तेजःपद्मलेश्ययोः केवलद्वयविवर्जिता दश, शुक्लायां सर्वे, भव्ये केवलद्वयोना दश, अभव्ये चक्षुरचक्षुरज्ञानत्रिकाणि पंच, औपशमिकसम्यक्त्वे प्रथमज्ञानत्रयचक्षुरचक्षुरवधिदर्शनानि षट्, वेदके केवलयुगाज्ञानत्रिकहीना' सप्त, अज्ञानत्रयहीना' क्षायिके नव, सासनमिथ्यादृष्ट्योश्चक्षुरचक्षुर्दर्शनाज्ञानत्रिकाणि पंच, मिश्रे प्रथमज्ञानत्रिकचक्षुरचक्षुरवधिदर्शनानि मिश्राणि षट्, संज्ञिनि केवलद्वयहीना दश, मतिश्रुताज्ञानचक्षुरचक्षुर्दर्शनानि चत्वारोऽसंज्ञिनि, आहारे सर्वे, अनाहारके विभंगमनःपर्यय चक्षुर्दर्शनहीना नव । मार्गणासु एवमुपयोगा निरूपिता' ।

अथ योगा निरूप्यन्ते——

त्रयोदश मनुष्यपंचाक्षत्रसे गतित्रये ।
योगा योज्या' परेष्वेवमिन्द्रियादिषु कायिके ॥ ८ ॥

स्पष्टं यन्त्रम्——

नारक	ति	मनु	दे	ए.	द्वि.	त्रि.
११	११	१२	११	३	४	४
च	पं	पृ	अ	तेज.	वायु	वन.
४	१५	३	३	३	३	३
त्रस	स. म.	अ. म	उ. म.	अ	स. व	अ. व.
१५	१	१	१	१	१	१

उ व	अ व	औदा	औ. मिश्र	वै	वै. मिश्र	आहा.	
१	१	१	१	१	१	१	
आ. मिश्र	का.	स्त्री	पु	नपु	क्रो.	मा.	
१	१	१३	१५	१३	१५	१५	
माया	लोभ	कुमति	कुश्रु	विभ.	मति.	श्रु	अव
१५	१५	१३	११	९	१५	१५	१५
मनः	केवल.	साम्प.	छेदो.	परि	सू.	यथा	देशसंयम
९	७	११	११	९	९	११	९
असंय	चक्षु द	अच द.	अव द	के. द	कृ.	नील.	का.
१३	११	१५	१५	७	११	१३	१३
तेजो	पद्म.	शु	भव्य	अभ	औप	वेदक	क्षायिक
१५	१५	१५	१५	१३	३	१५	१५
सास	मिश्र	मि	सं	अ.	आ.	अ	
१३	१	१३	१५	४	१४	१	

तत्प्रकारः स्पष्टे——

गत्यन्तेनाहारकद्वया भवान्तरेनयारकायवर्ज योगाः, निराहार-युगवैक्रियिकयुगाः तिर्यक्ष्वेकादश, वैक्रियिकद्वयहीना मनुष्येषु त्रयोदश, एकाक्षे कार्मणौदारिकौदारिकमिश्राभिधास्त्रयः, विकलव्यसम्यमृषाभाषाभोगसहितास्त चत्वारः, पञ्चाक्ष सक ला, पंचसु स्थावरेष्वेकाक्षवत्कायास्त्रयः, त्रसेषु सर्वे, योगेष्वको निजोनिजः, स्त्रीनपुंसकयोर्निराहारकद्वयास्त्रयोदश, पुंसि पंच दश, कषायचतुष्के सर्वे, मत्यज्ञानश्रुताज्ञानयोर्निराहारका स्त्रयोदश, विभंगे मिश्रत्रिकाहारककार्मणहीना दश, मतिश्रुता वधिषु सर्वे, तुर्यज्ञाने मनोवचश्चतुष्कौदारिकयोगा नव, आद्य दमनोवचोयोगौदारिकद्वयकार्मणाः सप्त केवले, आद्यसंयमया-

१ आहारकद्वयोदारिकद्वयहीना ।

वैक्रियिकमिश्रत्रिकोना, यथाख्याते वैक्रियिकद्वयाहारकद्वयोनाः, परिहारसूक्ष्मसांपरायदेशसंयमेषु मनोवचनौदारिकयोगा नव, त्रयोदशासंयमे निराहारकद्वया, चक्षुर्दर्शने मिश्रत्रिकहीना द्वादश, अचक्षुरवधिदर्शनयोः सर्वे, केवलदर्शने केवलज्ञानोक्ता, कृष्णनीलकापोतासु निराहारकद्वयास्त्रयोदश, तेजःपद्मशुक्लासु सर्वे, भव्ये सर्वे, अभव्ये निराहारकद्वयास्त्रयोदश, औपशमिकसम्यक्त्वसासादनमिथ्यादृष्टिषु आहारकद्वयहीनास्त्रयोदश, वेदकक्षायिकयोः सर्वे, मिश्रे मिश्रत्रिकाहारककार्मणहीना दश, संज्ञिनि सर्वे, असंज्ञिनि कार्मणौदारिकद्वयासत्यमृषोयोगाश्चत्वारः, आहारके निःकार्मणाश्चतुर्दश, एकः कार्मणोऽनाहारके। एवं मार्गणासु योगा योजिताः।

जीवसमासेषूपयोगा उच्यन्ते——

जीवस्थानेषु चत्वार उपयोगा द्वयोर्द्वयोः[1]।
अथ एकादशस्विष्टा एकत्र द्वादशस्फुटम् ॥ ९ ॥

तदित्थम्——११, ३। २, ४। १, १२।

तत्प्रकार उच्यते——

तत्र मत्यज्ञानश्रुताज्ञानाचक्षुर्दर्शनान्येकादशसु त्रय, मत्यज्ञानश्रुताज्ञानाचक्षुर्दर्शनचक्षुर्दर्शनानि चतुरिन्द्रियासंज्ञिनाः पूर्णयोर्द्वयोश्चत्वारः, संज्ञिनि पूर्णे द्वादशोपयोगाः।

जीवस्थानेषु योगा उच्यन्ते——

१ संज्ञिपञ्चेन्द्रियापर्याप्तस्य एकजीवापेक्षया जघन्येन त्रय उपयोगाः सम्भवन्ति नानाजीवापेक्षया तु षट्। इति विचारणीयम्।

द्वौ चतुर्षु नवस्वेकः समस्ता सति संज्ञिनि ।
जीवस्थानेषु विज्ञेया योगा योगविशारदैः ॥ १० ॥

तदित्थम्——१, १ । ४, २ । १, १५ ।

तत्प्रकार सूच्यते——

अपर्याप्तकेन्द्रियस्यो पर्याप्तस्यौदारिक एकः, सप्तस्वपर्याप्तेष्वौदारिकमिश्र एकः इति । समुदायेन नवस्वेको योगः द्वीन्द्रियत्रीन्द्रियचतुरिन्द्रियासंज्ञिषु पर्याप्तेषु चतुर्षु द्वौ काययोगौ, संज्ञिनि पर्याप्ते पंचदश योगा ।

पंच षट् सप्त ज्ञेया द्वौ त्रित्रिसप्तत्रिषु क्रमात् ।
गुणस्थानेषु विज्ञेयाश्चोपयोगा मनस्विभिः ॥ ११ ॥

त इत्थम्—५।५।६।६।६।७।७।७।७।७।७।२।२।

तत्राज्ञानत्रयचक्षुरचक्षुर्दर्शनानि मिथ्यादृष्टिसासादनयोर्द्वयोः प्रत्येकं पंच, ज्ञानत्रयचक्षुरचक्षुरवधिदर्शनानि मिश्रासंयतदेशसंयतेषु त्रिषु षट्षट्, परं मिश्रे ज्ञानान्यज्ञानमिश्राणि, चत्वारि ज्ञानानि त्रीणि दर्शनानि सप्तसु यतिषु सप्तकम्, केवलज्ञानकेवलदर्शने द्वयोः केवलिनोः प्रत्येकं द्वावुपयोगौ ।

[1]३, २ । ३, २ । ३, ३ । ३, ३ । ३, ३ । ४, ३ । ४, ३ ।
४, ३ । ४, ३ । ४, ३ । ४, ३ । ४, ३ ।

सयोगायोगयोः १, १ । १, १ ।

आद्ययोर्गुणयोर्योगा विज्ञातव्यास्त्रयोदश ।
दश मिश्रे प्रमत्तस्य एकादश विचक्षणैः ॥ १२ ॥

१ अत्र प्रथमतः ज्ञानोपयोगसंख्याकाः पश्चाद्दर्शनोपयोगसंख्याकाः । एवं सयोगायोगयोरपि ।

गुणानां सप्तके योगा नव सप्त मता' जिनै' ।
सयोग योगनिर्मुक्ते न यागा योगिपूजिते ॥ १३ ॥
१३।१३।१०।१३।९।११।९।९।९।९।९।९।७।०।

मिथ्यात्वसासनाव्रतेषु त्रिष्वाहारकद्वयहीना त्रयोदश, मिश्रे मिश्रत्रयाहारकद्वयकार्मणहीना दश, प्रमत्त वैक्रियिकद्वयौदारिकमिश्रकार्मणहीना एकादश, देशसंयताप्रमत्तादिषु सप्तसु वैक्रियिकद्वयाहारकद्वयौदारिकमिश्रकार्मणहीना नव, आद्यत मानसद्वयार्यवचनद्वयौदारिकद्वयकार्मणलक्षणा यागिनि सप्त योगा' ।

यागिन्यौदारिको दंड मिश्रो योगः कपाटके ।
कार्मणो जायते तत्र, प्रतरे लोकपूरणे ॥ १४ ॥

मिथ्यात्वाविरती यागः कषाय कथिता जिनैः ।
चत्वार' प्रत्यया' मूले कर्मबन्धविधायिन' ॥ १५ ॥
उत्तरा' प्रत्यया पंच द्वादश प्रत्ययाविर्ग ।
जिनै' पंचदश प्रोक्ता' क्रमश' पंचविंशति ॥ १६ ॥
सामान्येन विशेषेण मौलिका' प्रत्यया बुधै ।
गुणस्थानेषु सर्वेषु योजनीया यथागमम् ॥ १७ ॥
मिथ्यात्वयुजि चत्वारो निर्मिथ्यात्वा गुणत्रये ।
विरत्यविरतिर्मिश्रा देशे द्वौ गुणपंचके ॥ १८ ॥
गुणानां त्रितये याग' केवल' प्रत्यय' स्मृत ।
अन्तिमः प्रत्ययातीत' कर्मकक्षनिकर्तनः ॥ १९ ॥
दक्षत्रसविरत्याख्या स्थावराविरतिर्मता ।
सार्द्ध योगकषायाभ्यां संयतासयते त्रयः ॥ २० ॥

नानैकधर्मयप्येत नानकआश्रमभागिनाम् ।
गुणस्थानेषु सर्वेषु प्रथमा प्रत्यया मता ॥ २१ ॥
तदित्थम्—४।३।३।३।३।२।२।२।२।२।१।१।१।० ।
उत्तरप्रत्ययानाह—
आर्षं सांशयिकं ज्ञय अज्ञानाज्ञानिकं परं ।
विनयैकान्तिकं चान्ये मिथ्यात्वं पञ्चधा मतम् ॥ २२ ॥
सर्वज्ञेन विरागेण जीवाजीवादि भाषितम् ।
सत्यं न वेति संदेहस्तत्र सांशयिकं स्मृतम् ॥ २३ ॥
केवली कवलाहारी सग्रन्थो मोक्षसाधकः ।
जीवविध्वंसने धर्मो विपरीतमिदं विदुः ॥ २४ ॥
हिताहितापरीक्षायामाज्ञानिकमुदाहृतम् ।
सर्वेषु देवधर्मेषु साम्यं वैनयिकं मतम् ॥ २५ ॥
इदमेवास्त्यमेवेति सर्वथा धर्मधर्मिणाः ।
प्राहिका बुद्धिपी भास्करैकान्तिकमुदाहृतम् ॥ २६ ॥
जीवानां हिंसने षण्णामिन्द्रियाणामयंत्रणे ।
द्वादशाविरतिर्भेदा गदिता मतकर्मणे ॥ २७ ॥
चत्वारो मनसा योगाश्चत्वारो वाचिका मता ।
कायिकाः सप्त योगाः पंचदशेत्यतः ॥ २८ ॥
तेजसेन यतः कर्म बध्यते न न जीर्यते ।
तेनासौ न तदा योगो गीयते योगवेदिभिः ॥ २९ ॥
सदा निरूपभोगस्य क्षण एकः प्रवन्यतः ।
उक्तो मध्यंतस्तस्य षट्पष्टिः सागरा स्थितिः ॥ ३० ॥
कषाया पाडश प्रोक्तानोकषाया नवरिताः ।
ईषद्भेदा न भेदोऽस्ति कषायाः पंचविंशतिः ॥ ३१ ॥